P.V.G.'s

# Muktangan English School & Jr. College,

44, Vidyanagari, Parvati, Pune - 411009.

## Terminal Examination (2025-26)

## Standard - X

Subject : Sanskrit (Entire) Marks : 80

Date : 14 | 10 | 2025 Time : 8.00 am to 11.00 am

**सूचना :**

१) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।

२) यथास्चनम् आकलनकृतय: व्याकरणकृतय: आरेखितव्या: ।

३) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम् ।

४) रिक्तस्थानपूरणे युज्यमानां: शब्दा: अधोरखितव्या

**प्रथम : विभाग : – सुगमसंस्कृतम् (८)**

**प्र.१ (अ) चित्रं दृष्टवा नामानि लिखत । (५ त: ४)** **(4)**

१) 

२) 

३) 

४) 

५) 

**(आ) सङ्ख्या अक्षरै: अङ्कै: वा लिखत । (३ त: २)** **(2)**

१) ६० –

२) चतुरचत्वारिंशत् –

३) ८६ –

**(इ) समय – स्तम्भमेलनं कुरूत । (४ त: २)** **(2)**

| अ | ब |
|---|---|
| १) विंशत्यधिक – पञ्चवादनम् | १२.१५ |
| २) पञ्चोन् – षड्वादनम् | ५.२० |
| ३) दशाधिक – एकादशवादनम् | ५.५५ |
| ४) सपाद – द्वादशवादनम् | ११.१० |

**द्वितीय : विभाग : – गदयम् (२०)**

**प्र.२ (अ) चित्रं दृष्टवा नामानि लिखत । (४ त:३)**

सर्कसस्वामिन: विवशता मया अवगता । यदृच्छया प्राप्त: अयं परोपकारस्य अवसर: इति मत्वा तस्य साहाय्यं करणीयमिति मया निश्चितम् । भल्लूकवेषे अब्दुल: शोभेत इति मत्वा स: भल्लूकपात्रे नियोजित: । व्याघ्रस्य अभिनयार्थम् अहं स्वयमेव सिद्ध:। एवं पात्रयोजना निर्धारिता ।

कार्यक्रमात् प्रागेव अहं तथा अब्दुल: व्याघ्रभल्लूकवेषौ धृत्वा स्वपञ्जरयो: समुपस्थितौ । मम पञ्जरस्य पुरत: एव अधिक: सम्मर्द: जात: । यावच्छक्यम् अहं जनान् रञ्जयितुं प्रयत्तवान् किन्तु जना: न सन्तुष्टा: । ''किमयं व्याघ्र:? कृशोऽयम्'' इति उपहासेन अवदन् । तदा एव एका महिला स्वपुत्रेण सह व्याघ्रं द्रष्टुम् आगता । मम गर्जनां श्रुत्वा बाल: भीत: अत: सा माता मयि पाषाणखण्डान् अक्षिपत् । तदा वेदनया बाधित: अहं क्षणं यावत् व्याघ्र: न वदति इति विस्मृत्य अवदम्,

''दृष्ट्वा पञ्जरस्थितान् व्याघ्रान्, महिला: क्षिपन्ति पाषाणखण्डान् ।''

मम वाक्यसमाप्ते: पूर्वमेव व्याघ्रस्य मनुष्यवाण्या भाषणेन मूर्च्छिता सा महिला 'भूतोऽयं भूत'...इति उच्चै: आक्रोशन्ती भूमौ पतिता । मम पुत्र: राघु: अपि एकवारं पञ्जरसमीपम् आगत्य, ''आप्पा ! चायं पातुम् इच्छति किम्?'' इति यदा पृष्टवान् तदा प्रेक्षका: सम्भ्रान्ता: एव ।

**(१) अवबोधनम् । (४ त: ३)** **(3)**

अ) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

सर्कसस्वामि: साहाय्यं करणीयमिति चिमणरावेन चिन्तितं यत; ------------- ।

१) अयं परोपकारस्य अवसर: इति तस्य मतम् ।

२) सर्कसस्वामी तस्य भ्राता ।

आ) क: कं वदति?

''चायं पातुम् इच्छसि किम्?''

इ) पूर्णवाक्येन उत्तरं लिखत ।

महिला केन सह व्याघ्रं द्रष्टुम् आगता?

ई) वाक्यं पुर्नलिखित्वा सत्यम् / असत्यम् इति लिखत ।

अब्दुल: व्याघ्रपात्रे नियोजित: ।

**(२) अ) शब्दज्ञानम् (उ त: २)** **(2)**

द्वौ (२) पूर्णकालवाचक धातुसाधित ल्यबन्त अव्यये चित्वा लिखत ।

आ) प्रश्ननिर्माणं कुरूत ।

अहं वेदनया बाधित: ।

इ) गद्यांशात् विशेषणं चित्वा लिखत ।

१) ----------- सम्मर्द: ।

२) ----------- प्रेक्षका ।

**(३) पृथक्करणम् ।** **(2)**

क्रमेण योजयत ।

१) माता व्याघ्रे पाषाण खण्डान् अक्षिपत् ।

२) व्याघ्रस्य पुरत: सम्मर्द: जात: ।

३) व्याघ्रस्य मनुष्यवाण्या भाषणेन महिला मूर्च्छिता ।

४) व्याघ्रस्य गर्जनया बाल: भीत: ।

**(आ) गद्यांश पठित्वा निर्दिष्टा: कृती: कुरुत ?**

आसीत् सुदासो नाम कश्चिदुद्यानपाल: । तस्य तडागे कदाचित् सत्यपि शिशिर–ऋतावेकं पद्मं व्यकसत्, व्योम्नीव बालसूर्यबिम्बम् । सोऽचिन्तयत्, ‘अहो महिमा परमात्मन:, यदेतादृशे कालेऽतिशीते विभूषितो मे तडाग एतस्य सरसिजस्य विकासेन । एतत् सरसिजं विक्रीयाहं विपुलं धनं प्राप्नुयाम्’ इति । एवं सञ्चिन्त्य स तद् विक्रेतुं राजसद्मन: पुरत: स्थित: । अत्रान्तरे तेनैव अध्वना कश्चित् श्रीमान् सार्थवाह: समायात: । सोऽवदत्, ‘भद्र, भगवान् सुगत: सम्प्रत्येतस्मिन्नगरे वसति । महात्मन: तस्य पूजार्थमिदं कमलमभ्यर्थये । तत्कियता मूल्येन ददासि?’ उद्यानपालोऽब्रवीत्, ‘एकेन सुवर्णनाणकेन’ । अथ स सार्थवाह: यावत्तत् कमलं क्रेतुमिच्छति, तावदेवापरो धनवान् श्रेष्ठी अपि सुगतदर्शनार्थं गच्छन् तत्र समुपस्थित: । नीरजमूल्यं पृच्छन्तं तं श्रेष्ठिनम् उद्यानपालोऽब्रूत ‘एष महाभाग एकं सुवर्णनाणकम् एतस्यार्थे दातुमिच्छति’ । श्रेष्ठी अगदत्, ‘अहं दश सुवर्णनाणकानि यच्छामि’ । सार्थवाहोऽभणत्, ‘अहं शतं सुवर्णनाणकानि प्रयच्छामि’ । तयोर्विवादं श्रुत्वा सुदासो व्यमृशत् ‘यस्य कृते एतौ कमलमेतत्

क्रेतुमिच्छत:, नूनं स सुगत एवाधिकतमं मूल्यं मह्यं दद्यात्' इति । अत: स उद्यानपालस्तावभाषत 'नैतद् भो विक्रेतुमिच्छामि' इति ।

अथ प्राप्त: सुदासस्तदुद्यानं, यत्र भगवत: सुगतस्य निवास: । तत्र वटवृक्षस्याधस्तादेकस्मिन्नश्मखण्डे समुपविष्ट आसीत्स महात्मा । अनल्पेन धाम्ना राजते स्म तस्य भगवतो वदनम् । तदालोकयत: सुदासस्य चित्ते भक्तिरसार्णव उदतिष्ठत् । स हस्तस्थं नीरजं भगवत: सुगतस्य चरणयोरर्घ्यं कृत्वा 'नमो भगवते' इति वदन् सविनयं प्राणमत् ।

**अवबोधनम् (४ त: ३)** **(3)**

अ) उचितं पर्यायं चित्वा वाक्यं पुर्नलिखित ।

अतिशीते काले सुदामस्य तडाग: विभूषित: यत: ---------- ।

१) तस्य तलावस्य जलम् अतीव शुद्धं आसीत् ।

२) तस्य तडागे बालसूर्यस्य बिम्बमेव पद्मं व्यकसत ।

आ) क: कं वदति ।

तत्कियता मूल्येन ददासि ।

इ) पूर्णवाक्येन उत्तरं लिखत ।

सुदास: किं सञ्चित्य राजसद्मन: पुरत: स्थित:?

इ) सत्यं वा असत्यं लिखत ।

सार्थवाह: एकं सुवर्णनाणकम् एतस्यार्थे (कमलार्थे) दातुमिच्छामि ।

२) **शब्दज्ञानम् । (३ त: २)** (**2**)

१) प्रश्ननिर्माण कुरूत ।

तस्य तडागे शिशिर-ऋतौ एकं पद्मं व्यकसत्?

२) चतुर्थपदं लिखत ।

विपुलं = धनम् , श्रीमान् - -----------।

३) सन्धिविग्रहं कुरूत ।

कुश्चिदुद्यानपाल: = ----- + --------- ।

३) पृथक्करणम् । (2)

तालिका पूरयत ।

| सार्थवाह | उद्यानपाल: |
|---|---|
| | |

मञ्जुषा (एकेन सुवर्णनाणकेन । अहं सुवर्णनाणकानि प्रयच्छामि । सुगत: एकस्मिन्, नगरे वसति एष: महाभाग: । एकं सुवर्णनाणकं एतस्यार्थे दातुमिच्छति ।)

**(इ) गद्यांशं पठित्वा सरलार्थं लिखत । (२ त: १)** **(4)**

१) (तत: प्रविशति वैखानस:, अन्यौ तापसौ च)

वैखानस: - (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्य:, न हन्तव्य: । आशु प्रतिसंहर सायकम् । राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् ।

दुष्यन्त: - प्रतिसंहृत एष: सायक: । (यथोक्तं करोति)

वैखानस: - राजन् ! समिदाहरणाय प्रस्थितावयम् ।

**अथवा**

२) वसन्तसेना - (बाहू प्रसार्य) एहि मे पुत्रक! अनुकृतमनेन पितु: रूपम् । अथ किं निमित्तमेष रोदिति?

रदनिका - एतेन प्रतिवेशिक-दारकस्य सुवर्णशकटिकया क्रीडितम्, तेन च सा नीता, तत: पुनस्तां याचते ततो मया इयं मृत्तिकाशकटिका कृत्वा दत्ता ।

**ई) माध्यमभाषया उत्तरं लिखत । (२ त: १)** **(2)**

१) भूमाता पृथुवैन्यं किम् उपादिशत्?

२) महर्षि कणाद: परमाणुविषये किं प्रतिपादितवान्?

## तृतीय : विभाग : – पदयम् (१८)

**प्र. ३ अ) पद्यशांन् पठित्वा निर्दिष्टा: कृती: कुरुत ।**

१) यथा चतुर्भि: कनकं परीक्ष्यते निघर्षणच्छेदनतापतऽनै: ।

तथा चतुर्भि: पुरुष: परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा ।।

२) यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्ध: समभवं

तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मन: ।

यदा किञ्चित्किञ्चिद् बुधजनसकाशादवगतं

तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगत: ।।

३) रथस्यैकं चक्रं भुजगयमिता: सप्त तुरगा: ।

निरालम्बो मार्गश्चरणविकल: सारथिरपि ।

रविर्यात्येवान्तं प्रतिदिनमपारस्य नभस: ।

क्रियासिद्धि: सत्वे भवत्ति महतां नोपकरणे ।।

**१) पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत । (३ त: २)** **(4)**

पूर्णवाक्येन उत्तरं लिखत ।

१) मनुष्य: द्विप इव मदान्ध: कुदा भवति?

२) चतुर्थपदं लिखत ।

१) निरालम्ब: – मार्ग: ——— चरणविकल: – ————

२) चतुर्थपदं – चक्रम् ——— सप्त: – ————

३) सन्धिविग्रहं कुरुत ।

किञ्चित्किञ्चिद् बुधजन सकाशादवगतम् =

किञ्चित् + ----------- + --------- + अवगत ।

२) **जालरेखाचित्रं पूरयत ।** **(2)**

पुरुषपरीक्षा कथं भवति

↓ ↓ ↓ ↓

**आ) माध्यमभाषया उत्तरं लिखत । (२ तः १)** **(2)**

१) मनुष्यः स्वकर्मणः कीदृशं फलं लभते?

२) 'विद्या नाम नरस्य' -------- इति श्लोका धारेण विद्यायाः महत्वं लिखत ।

**इ) पद्ये शुद्धे पूर्णे च लिखत ।** **(4)**

१) निन्दन्तु --------------

------------------

------------------

------------------ पदं न धीराः ।

**अथवा**

प्रथमवयसि --------------

------------------

------------------

------------------ साधवो विस्मरन्ति ।।

२) तावद् भयादिः ---------------- ।

------------------ ।।

**अथवा**

उत्तमो नातिवक्ता -------------- ।

------------------ ।।

**ई) अन्वयं पूरयत ।** **(2)**

१) शुकसारिकाः ------, -------- बध्यन्ते । तत्र

बकाः न ----- (यतः) ------ सर्वार्थसाधनम् ।

**उ) माध्यमभाषया सरलार्थं लिखत । (३ तः २)** **(4)**

१) शीलं सद्‌गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।

उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।

२) अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ।।

३) वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दु:खहरणं हितं सद्ग्रन्थवाचनम् ।।

## चतुर्थः विभागः – लेखन कौशलम् (९)

**प्र. ४ अ) धातूनाम् अव्ययानां च विशिष्टविभक्तेः उपयोग कृत्वा वाक्यनिर्माणं कुरुत । (६ तः ४)** **(4)**

१) वि + रम् (१ प. प.) –

२) याच् (१ आ. प.) –

३) स्निह् (४ प. प.) –

४) परितः –

५) विना –

६) उपरि –

**अथवा**

संस्कृतानुवादं कुरुत । (६ तः ४)

1) I like Kheer very much

2) Going to the temple the gramdmother recites the stotra.

3) We read the book yesterday.

4) Radhika collects flowers for worshippng.

5) What are you doing in the Library?

6) Geeta goes to the school by bicycle.

**आ) ५–७ वाक्यात्मकं निबन्धं लिखत । (३ तः १)** **(5)**

१) मम प्रियः खगः ।

२) मम प्रियः पुस्तकम् ।

३) मम प्रियः कविः

**अथवा**

साहाय्यक शब्दानाम् आधारेण ५-७ वाक्यात्मकं चित्रवर्णनं कुरूत ।




(मञ्जुषा - तिष्ठति, विक्रीणाति, पठति, उपविशति, नयति, वहति, अवतरति, पश्यति, पिबति)

## पञ्चमः विभागः - भाषाभ्यासः (१७)

**प्र. ५ अ) तालिकापूर्तिं कुरुत ।** **(2)**

१) नाम तालिकां । (६ तः ४)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ती |
|---|---|---|---|
| - | शशिभ्याम् | - | तृतीया |
| - | - | वणिक्षु | सप्तमी |
| जगत् | - | - | प्रथमा |

२) सर्वनामतालिका । (६ त: ४) (2)

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्ती |
|---|---|---|---|
| – | आवाभ्याम्/नौ | – | चतुर्थी |
| – | – | कान् | द्वितीया |
| अस्या: | – | – | षष्ठी: |

**३) क्रियापदतालिका । (६ त: ४)** (2)

| लकारा: | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुष |
|---|---|---|---|---|
| लङ्ग | – | आस्ताम् | – | प्रथम पु. |
| लट् | – | – | युध्यध्वे | मध्यम पु. |
| लोट् | कथयानि | – | – | उत्तम पु. |

**४) धातुसाधित – विशेषण – तालिका । (६ त: ४)** **(2)**

| धातु: | क्त | क्तवतु | कृत्या: | शतृ/शानच् |
|---|---|---|---|---|
| मन् (४ आ.व.) | मत: | – | मन्तव्य: | |
| खाद् (१ प. प.) | – | खादितवान् | – | खादन् |
| प्रच्छ् (६ प.प.) | पृष्ट: | – | – | पृच्छन् |

**आ) निर्दिष्टा: कृती: कुरुत । (४ त: ३)** **(9)**

**१) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत (५ त: ३)** **(3)**

क) --------- (३) महिला: जलमाहतु गच्छन्ति । (सङ्ख्यावाचकम्)

ख) अस्माकं कुटुम्बं संवत्सरस्य ------ (१) पर्यटनार्थं गच्छति । (आवृत्तिवाचकम्)

ग) शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे ------ (८) शतके अभवत् । (क्रमवाचकम्)

घ) दिनस्य ------ (९) लोकयानम् आगच्छति । (आवृत्तिवाचकम्)

च) भगवद्गीतायाम् अष्टादशे अध्याये ------ (७८) श्लोका: सन्ति । (सङ्ख्यावाचकम्)

२) **समासानां तालिकापूर्तिं कुरुत । (५ तः ३)** **(3)**

| समस्तपदम् | विग्रहः | समासमान |
|---|---|---|
| मातृसेवा | मातुः सेवाः | ---- |
| मृगशृगालौ | ---- | इतरेतरव्दन्व्दः । |
| ---- | परमः अणुः | कर्मधारय । |
| सकोपम् | कोपेन सह | ----- |
| ----- | मुख्यस्य दोषः | षष्ठी तत्पुरुषः |

३) **समानार्थकशब्दान् । विरुद्धार्थकशब्दान् लिखत । (५ तः ३)** **(3)**

१) रासभः - २) कृशाः × ३) गृहम् -

४) सुकृतम् × ५) सैनिकः -

४) **सूचनानुसारं कृतीः कुरुत । (५ तः ३)** **(3)**

१) सम्यग् उक्तं त्वया । (वाच्यपरिवर्तनं कुरुत)

२) तयोः विवादं श्रुत्वा सुदासः व्यमृशत् । (त्वान्तम् अव्ययं निष्कासयत)

३) त्वं द्रष्टुं शक्नोषि । ('त्वं' स्थाने 'भवान्' योजयत ।)

४) आचार्यः तं प्रणनाम । (लङ्गलकारे परिवर्तयत।)

## षष्ठः विभागः – अपठितम् (८)

**प्र. ६ अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)** **(8)**

गङ्गातीरे एकः साधुः आसीत् । यः अपकारं करोति तस्यापि उपकारं करोति स्म सः । प्रतिदिनं सः स्म सः । प्रतिदिनं सः गङ्गानद्यां स्नानं करोति स्म । एकस्मिन् दिने नदीप्रवाहे सः एकं वृश्चिकं दृष्टवान् । तं हस्तेन गृहीत्वा तीरे स्थापयितुं प्रयत्नं कृतवान् । किन्तु वृश्चिकः साधोः हस्तम् अदशत् । एवम् अनेकवारं साधुः वृश्चिकं गृहीतवान् । वृश्चिकः अपि अदशत् । नदीतीरे कश्चन पुरुषः आसीत् । सः साधुम् उक्तवान्, ''साधुमहाराज! अयं दुष्टः वृश्चिकः पुनः पुनः दशति । भवान् किमर्थं तं हस्ते वृथा स्थापयति? वृश्चिकं त्यजतु'' इति । ''वृश्चिकः क्षुद्रः जन्तुः । दशनं तस्य स्वबावः । सः स्वस्वभावं न त्यजति । अहं तु मनुष्यः । अहं मम परोपकारस्वभावं कथं त्यजामि?'' इति साधुः तं पुरुषम् उक्तवान् ।

१) **पूर्णवाक्येन उत्तरं लिखत ।** **(1)**

साधुः नदीप्रवाहे कं दृष्टवान्?

२) **प्रातिपदिकं लिखत ।** **(1)**

(क) साधो:

(ख) अहम्

३) **वाक्यं पुनर्लिखत्वा सत्यम/असत्यम् इति लिखत ।** **(1)**

दशनं वृश्चिकस्य स्वभाव: ।

४) **माध्यमभाषया सरलार्थं लिखत ।** **(1)**

अहं मम परोपकारस्वभावं कथं त्यजामि?

५) **गद्यांशात् लङ्लकारस्य १ क्रियापदं चित्वा लिखत ।** **(1)**

६) **कारकपरिचयं कुरुत ।** **(1)**

गङ्गातीरे एक: साधु: आसीत् ।

आ) **पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।** **(2)**

विरला: जानन्ति गुणान्, विरला: कुर्वन्ति निर्धनेस्नेहम् ।

विरला: पर्यकार्यरता: परदु:खेनापि दु:खिता विरला: ।।

क) **पूर्णवाक्येन उत्तरत ।** **(1)**

१) के गुणान् जानन्ति?

२) विरला: केन दु:खिता:?

ख) **विरुद्धार्थक शब्दं लिखत ।** **(1)**

गुणा: × —— ।

पद्यांशं पठित्वा जालरेखाचित्रं पूरयत ।

२) **रविश्चन्द्रो घना वृक्षा: नदी गावश्च सज्जना: ।** **(2)**

**एते परोपकाराय लोके देवेन निर्मिता: ।।**




❖❖❖